श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री कृष्णमाचार्यस्वामि विरचितम्

# ॥ आचार्यमङ्गळम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ आचार्यमङ्गळम् ॥

मङ्गळं श्रीनृसिंहाय कमलायै च मङ्गळम्।
विष्वक्सेनाय शठजिन्नाथाभ्यां चैव मङ्गळम्॥ १ ॥

मङ्गळं पुण्डरीकाक्षरामाभ्यां यामुनाय च।
मङ्गळं पूर्णमिश्राय भाष्यकाराय मङ्गळम्॥ २ ॥

मङ्गळं निगमान्तादिपारीणाय महात्मने।
सर्वतन्त्रस्वतन्त्राय वेदान्तगुरवे सदा॥ ३ ॥

अहोबिलमठास्थाननिर्मात्रे च सुयोगिने।
आदिवण्शठकोपाय सदा भवतु मङ्गळम्॥ ४ ॥

नृसिंहमन्त्रवेत्रे च रङ्गनाथशठारये।
सर्वत्र जयशीलाय योगिने मङ्गळं सदा॥ ५ ॥

ज्ञानानुष्ठानशीलाय बहुस्तोत्राणि तन्वते।
मङ्गळं सततं भूयात् मानृसिंहशठद्विषे॥ ६ ॥

विद्वत्समाजमान्याय गुणाष्टकमुपेयुषे।
मङ्गळं सततं भूयात् श्रीमद्रङ्गशठारये॥ ७ ॥

नृसिंहपदभक्ताय शिष्यानुग्रहकारिणे।
मङ्गळं सततं भूयाद् वीरराघवयोगिने॥ ८ ॥

श्रावण्यां हस्तनक्षत्रे मन्मथे वत्सरे शुभे।
अवतीर्णाय वेदान्तगुरुवे मङ्गळं सदा॥ ९ ॥

पूर्वाचार्यैः सुमहिते सर्वमङ्गळशोभिते।
मुक्कुर्ग्रामेऽवतीर्णाय तस्मै भव्याय मङ्गळम्॥ १०॥

कर्माण्योपनयादीनि यथाकालं यथाविधि।
पितुः सकाशात् संप्राप तस्मै धीराय मङ्गळम्॥ ११॥

पुरा श्रीमुष्णनगरे यो वेदं समधीतवान्।
तस्मै शान्तस्वरूपाय यतिवर्याय मङ्गळम्॥ १२॥

दक्षिणद्वारकायां च सामोदं शाश्वतीः समाः।
यो वासमकरोत् तस्मै यतिराजाय मङ्गळम्॥ १३॥

तिल्लयम्बूर्-चक्रवर्ति-गुरुवर्यस्य सन्निधौ।
श्रुत्वाधिकृत्य श्रीभाष्यमेधमानाय मङ्गळम्॥ १४॥

निर्माय वेश्म श्रीकाञ्च्यां वास कृत्वा प्रसन्नधीः।
पूजयामास हस्तीशं तस्मै प्राज्ञाय मङ्गळम्॥ १५॥

उज्जीवयामास जनानुपन्यासैर्मनोहरैः।
न्यासविद्योपदेष्ट्रे च नित्यश्रीर्नित्यमङ्गळम्॥ १६॥

गत्वा मुम्बापुरीं रम्यां मन्त्रार्थान् समुपादिशत्।
वैष्णवेभ्यः कुलीनेभ्यो यस्तस्मै नित्यमङ्गळं॥ १७॥

वर्षयामास सततं रामायणकथामृतम्।
विज्ञाननिधये तस्मै यतिवर्याय मङ्गळम्॥ १८॥

किंनु वेङ्कटनाथोऽसाविति विद्वद्भिरीक्षितः।
हेतुभिर्विविधैस्सद्भिस्तस्मै पूज्याय मङ्गळम्॥ १९॥

श्रीभाष्यकारतुल्याय पश्चाचार्यानुपेयुषे।
पुनर्भाष्यप्रचारार्थमवतीर्णाय मङ्गळम्॥ २०॥

तीर्थमूर्तिस्थलैः श्रेष्ठे प्रसिद्धे गारुडाचले।
प्रेषमन्त्रं समासाद्य मोदते तस्य मङ्गळम्॥ २१॥

वृश्चिके श्रवणे सौम्ये वत्सरे हेमलम्बिनि।
तुर्याश्रमं स्वीकृतवान् तस्मै प्रेष्ठाय मङ्गळम्॥ २२॥

वीरराघवयोगीन्द्रे श्रीवैकुण्ठमुपेयुषि।
प्राप्तस्थानभरायास्तु गुरुवर्याय मङ्गळम्॥ २३॥

अहोबिलमठास्थाने श्रीनृसिंहेन सादरम्।
अभिषिक्ताय मान्याय गुरवे नित्यमङ्गळम्॥ २४॥

तुर्याश्रमं समासाद्य नैमिशे मुनिसेविते।
अरक्षद् यो जनान् शिष्यान् तस्मै प्राज्ञाय मङ्गळम्॥ २५॥

उदारगुणसीम्ने च शिष्यक्षेमाभिकांक्षिणे।
त्रय्यन्तगुरवे तस्मै यतिराजाय मङ्गळम्॥ २६॥

सहस्रनामार्चनं यो द्विकालं कुरुते गुरुः।
शिष्यक्षेमैकचित्ताय तस्मै पूज्याय मङ्गळम्॥ २७॥

वीक्षारण्ये सरः कृत्वा प्रणम्य च रघूद्वहम्।
मुमुदे यो गुरुस्तस्मै सर्वदात्रे सुमङ्गळम्॥ २८॥

निर्माय गोपुरं रम्यं दुर्गमे गारुडाचले।
अर्चयामास नृहरिं तस्मै श्रेष्ठाय मङ्गळम्॥ २९॥

लक्ष्मीनृसिंहपादाब्जद्वन्द्वमाध्वीमधुव्रतः।
जयतात् श्रुतिचूडार्ययतीन्द्रो भुवि सन्ततम्॥ ३०॥

योऽसौ ब्रह्मबुभुत्सूनां सौकर्यार्थं यतीश्वरः।
सर्वेषां ब्रह्मसूत्राणां रम्यान् श्लोकान् मुदाऽकरोत्॥ ३१॥

शारीरकाधिकरणक्रमं ज्ञानाभिकांक्षिणाम्।
अकरोत् पद्यरूपेण गुरवेऽस्मै सुमङ्गळम्॥ ३२॥

विशिष्टाद्वैतसिद्धान्ततत्त्वानां सङ्ग्रहं गुरुः।
प्रकाशयामास मुदा तस्मै सेव्याय मङ्गळम्॥ ३३॥

स्तुतीः करावलम्बाद्याः शिष्याणां भक्तिवृद्धये।
योऽकरोत् कृपया तस्मै नित्यश्रीर्नित्यमङ्गळम्॥ ३४ ॥

द्विकालं यः पठेदस्य गुरुवर्यस्य मङ्गळम्।
बुद्धिर्बलं यशो धैर्यं विद्यायुः श्रीश्च वर्धते॥ ३५ ॥

पठतां शृण्वतां नृणां सदा क्षेमप्रदं भवेत्।
कृष्णदासेन रचितमाचार्यस्य सुमङ्गळम्॥ ३६ ॥

॥ इति आचार्यमङ्गळं संपूर्णम् ॥